# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – स्वामिनारायणवेदान्तः (J) | **कोड – CC-2.3.5** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – २९/११/२०१६ | सन्दर्भग्रन्थः – ईशकेनोपनिषदौ (रङ्गरामानुजभाष्यसहिते) | |

---

**प्रथमान्वितिः**

**प्र. १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **०८**

(१) असुर्याः लोकाः के ? के तत्र गच्छन्ति ?

(२) "कुर्वन्नेवेह कर्माणि....................।।" इतीमं मन्त्रं भाष्योक्तदिशा व्याख्यात ।

(३) हिरण्मयेन पात्रेण............।। इतीमं श्लोकं यथाभाष्यं व्याख्यात ।

**प्र. २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **०८**

(१) विद्याऽविद्ययोः फलं समन्त्रं प्रतिपादयत ।

(२) ईशावास्योपनिषदः प्रथमं मन्त्रं भाष्यवचोभिः व्याख्यात ।

**प्र. ३ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः ।** **०२**

(१) "ईशावास्यम्" इति शब्दस्य कोऽर्थः ?

(२) "जिजीविषेत्" इतीमं शब्दं व्याख्यात ।

**प्र. ४ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **०२**

(१) एषा ईशावास्योपनिषत् कस्मिन् वेदे दरिदृश्यते ?

(२) ईशावास्योपनिषदि कति मन्त्राः सन्ति ?

(३) केन इदं संपूर्णं जगत् पूर्णम् ?

(४) किं कुर्वन् शतं समाः जिजीविषेत् ?

**द्वितीयान्वितिः**

**प्र. ५ अधोनिर्दिष्टेषु प्रश्नेषु प्रश्नद्वयं यथाग्रन्थं व्याख्येयम् ।** **०८**

(१) "इह चेदवेदीदथ सत्यमस्ति............।।" इतीमं मन्त्रं व्याख्यात ।

(२) "श्रोत्रस्य श्रोत्रम्..................।।" इतीमं मन्त्रं व्याख्यात ।

(३) "यदि मन्यसे सुवेदेति...............।।" इतीमं मन्त्रं व्याख्यात ।

**प्र. ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **०८**

(१) केनोपनिषदः शान्तिमन्त्रं विलिख्य व्याख्यात ।

(२) केनोपनिषदः प्रथमखण्डोक्तं तत्त्वं भाष्यमनुसृत्य संगृह्णीत ।

**प्र. ७ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **०४**

(१) ''चक्षुषश्चक्षुरतिमुच्य धीराः'' इत्यत्र अतिमुच्यशब्दार्थः कः ?

(२) कदा महती विनष्टिः ?

(३) ''दभ्रम्'' नाम किम् ?

(४) ''तलवकारोपनिषत्'' पदमिदं व्याख्यात ।

**प्र. ८ निम्नलिखितेषु प्रश्नेषु केचन पञ्चप्रश्नाः समाधेयाः ।** **०५**

(१) ''केनोपनिषत्'' इति नाम्नः औचित्यं ब्रूत ।

(२) ''यच्चक्षुषा............................उपासते'' इतीमं मन्त्रं पूरयत ।

(३) का नाम उपनिषत् ?

(४) केनोपनिषत् कस्मात् वेदात् उपात्ता ?

(५) ''यस्यामतं..........................॥'' इतीमं मन्त्रं पूरयत ।

(६) केनोपनिषदः अपरं नाम किम् ?

(७) के धीराः ?

## तृतीयान्वितिः

**प्र. ९ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **०८**

(१) अग्निवाय्वोः शक्तिवैशिष्ट्यं निरुपयत ।

(२) वनोपासनस्य किं फलम् अभिहितम् ?

(३) अग्निवाय्वोः मध्ये अन्यतरस्य पराभवप्रकरणं विमृशत ।

**प्र. १० कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **०८**

(१) यक्षवाय्वोः संवादं विवृणुत ।

(२) चतुर्थखण्डस्य सारं सङ्गृह्णीत ।

**प्र. ११ निम्नलिखितेषु प्रश्नेषु द्वावेव समाधेयौ ।** **०४**

(१) ''जातवेदाः'' इतीदं पदं व्याख्यात ।

(२) ''मातरिश्वा'' इतीदं पदं व्याख्यात ।

(३) किमध्यात्मम् ?

(४) किमधिदैवतम् ?

**प्र. १२ अधोनिर्दिष्टेषु प्रश्नेषु केचन पञ्चप्रश्नाः समाधेयाः ।** **०५**

(१) देवेषु वरिष्ठः कः ?

(२) हैमवती का ?

(३) केनोपनिषदि फलत्वेन अभिहितस्वर्गशब्दः कस्य वाचकः ?

(४) केनोपनिषदि तत्त्वोपदेशप्रकारः कीदृशः ?

(५) केनोपनिषदि कति खण्डाः सन्ति ?

(६) वनमिति पदेन किं ज्ञेयम् ?

(७) स्वर्गपदेन किमभिहितम् ?